श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीपाटलाद्रिनरसिंहस्तुतिः ॥
## (सिङ्गप्पेरुमाळ् स्तुतिः)

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Dr. Dayanath, Asst. Professor, Department of Veda, Rashtriya Sanskrit Sansthan, who provided us the Devanaagarii script of this stotra, the original of which appears in Tamil on the wall of Singaperumal Kovil near Chengalpet.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीपाटलाद्रिनरसिंहस्तुतिः, ॥

जितन्ते महास्तम्भसम्भूतविष्णो
    जितन्ते जगद्रक्षणार्थावतार।
जितन्ते हरे पाटलाद्रौ निवासिन्
    जितन्ते नृसिंह प्रसीद प्रसीद॥ १ ॥

नमस्ते जगन्नाथ विष्णो मुरारे
    नमस्ते नृसिंहाच्युतानन्त देव।
नमस्ते कृपालो हरे चक्रपाणे
    नमस्स्तम्भसम्भूत दिव्यावतार॥ २ ॥

परब्रह्मरूपं प्रबुद्धाट्टहासं
    करे प्रौढचक्रं हरब्रह्मसेव्यम्।
प्रसन्नं त्रिनेत्रं हरिं पाटलाद्रौ
    शुभं मेघगात्रं नृसिंहं भजामः॥ ३ ॥

गिरिजनृहरिमीशं गर्वितारातिवज्रं
    परमपुरुषमाद्यं पाटलाद्रौ प्रसन्नम्।
अभयवरदहस्तं शङ्खचक्रे दधानं
    शरणमिह भजामः शाश्वतं नारसिंहम्॥ ४ ॥

श्रीनृसिंह महासिंह दिव्यसिंह प्रभो हरे।
गिरिसम्भव देवेश रक्ष मां शरणागतम्॥ ५ ॥

॥ इति श्रीपाटलाद्रिनरसिंहस्तुतिः समाप्ता ॥

www.prapatti.com